दोषः। शारीरत्वमप्यानन्दमयस्यान्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात् न पुनः साक्षादेव सशरीरत्वं संसारिवद् तस्मादानन्दमयः परएवात्मा। "विकारशब्दान्नेति चेन्न प्राचुर्य्यात्" सू०। अत्राह नानन्दमयः परात्मा भवितुमर्हति कस्मात्? विकारशब्दात्। प्रकृतिवचना-दयमन्यः शब्दो विकारवचनः समधिगत आनन्दमय इति मयटोविकारार्थत्वात् तस्मादन्नमयादिशब्दवद्विकारविषय एवायमानन्दमयशब्द इति चेन्न प्राचुर्य्यार्थेऽपि मयटः स्मरणात् "तत्प्रकृतवचने मयड़िति" (पा०) प्रचुरतायामपि हि मयट् स्मर्यते। यथान्नमयो यज्ञ इति अन्नप्रचुर उच्यते। आनन्दप्रचुरत्वञ्च ब्रह्मणः मनुष्यत्वादारभ्योत्तर-स्मिन्नुत्तरस्मिन् स्थाने शतगुण आनन्द इत्युक्त्वा ब्रह्मानन्दस्य निरतिशयत्वावधारणात् तस्मात्प्राचुर्य्यार्थे मयट्। "तद्धेतुव्यपदेशाच्च" सू०। इतश्च प्राचुर्य्यार्थे मयट् यस्मादानन्दहेतुत्वं ब्रह्मणोव्यपदिशति श्रुतिः "एष ह्येवानन्दयातीति"। आनन्दयतीत्यर्थः। योह्य-न्यानानन्दयति स प्रचुरानन्द इति प्रसिद्धं भवति यथा लोके योऽन्येषां धनित्वमापादयति स प्रचुरधन इति गम्यते तद्वत्। तस्मात्प्राचुर्य्यार्थेऽपि मयटः सम्भ-वादानन्दमयः परएव आत्मा। "मान्त्रवर्णिकमेव च गीय-ते" सू०। इतश्चानन्दमयः परएवात्मा यस्माद् "ब्रह्मविदा-प्नोति परम्" इत्युपक्रम्य हि "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यस्मिन्मन्त्रे यद्ब्रह्म प्रकृतं सत्यज्ञानानन्तविशेषणैर्निर्धारितं, यस्मादाकाशादिक्रमेण स्थावरजङ्गमानि भूतान्यजायन्त, यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायामवस्थितं सर्वान्तरं, यस्य विज्ञानायाऽन्योऽन्तर आत्मेति प्रक्रान्तं, तन्मान्त्रव-र्णिकमेव ब्रह्मेह गीयते "योऽन्योन्तर आत्मानन्दमय" इति। मन्त्रब्राह्मणयोश्चैकार्थत्वं युक्तम् अविरोधात्। अन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्यातां, न चान्नमयादिभ्य इवानन्द-मयादन्योन्तर आत्माऽभिधीयते एतन्निष्ठैव च सैषा भार्गवी वारुणी विद्या "आनन्दो ब्रह्मेतिव्यजानादिति"। तस्मादानन्दमयः परएवात्मा" शा०भा०।

२आनन्दप्रचुरे त्रि०सर्व्वायासशून्यसुषुप्त्यवस्थापन्ने ३आ-नन्दमयकोषाभिमानिनि जीवे च। "काचिदन्तर्मुखा वृत्तिरा-नन्दप्रतिविम्बभाक्। पुण्यभोगे भोगशान्तौ निद्रारूपेण जायते। कादाचित्कीत्यतोनात्मा स्यादानन्दमयोऽप्ययम्। विम्बभूतोय आनन्द आत्मासौ सर्व्वदा स्थितः" पञ्चद० उक्तेः जीवस्य पारमार्थिकानन्दरूपपरात्मस्वरूपत्वेऽपि सुषुप्तौ तस्य स्फुरणेऽपि च स्वल्पकालिकत्वात् ब्रह्मानन्दवै लक्षण्यम्। स्त्रियां ङीप्। सा च ४दुर्गामूर्त्तिभेदे स्त्री०।

**आनन्दमयकोष** पु० आनन्दमयस्य परमात्मनः कोष इवावरकः। वेदान्तिमतसिद्धपञ्चकोषमध्ये पञ्चमे कोषे अविद्यास्वरूपे कारणशरीरे। आनन्दमयकोषस्वरूपा-दिकमुक्तं विवे० चू०।

"आनन्दप्रतिविम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता स्यादा-नन्दमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः। पुण्य-स्यानुभवे विभाति कृतिनामानन्दरूपः स्वयं भूत्वानन्दति यत्र साधुतनुभृन्मात्रः प्रयत्नं विना। आनन्दमय-कोषस्य सुषुप्तौ स्फूर्त्तिरुत्कटा। स्वप्नजागरयोरीषदिष्ट-सन्दर्शनादिना। नैवायमानन्दमयः परात्मा सोपाधिकत्वात् प्रकृतेर्विकारात्। कार्य्यत्वहेतोः सुकृतक्रियायां विकार-सङ्घातसमाहितत्वात्। पञ्चानामपि कोषाणां निषेधे युक्तितः श्रुतेः। तन्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते। योऽयमात्मा स्वयंज्योतिः पञ्चकोषविलक्षणः। अवस्था-त्रयसाक्षी सन् निर्व्विकारो निरञ्जनः। सदानन्दः स विज्ञेयः स्वात्मत्वेन विपश्चिता"।

आनन्दमयशब्देऽधिकमुक्तम्। "गुहाहितं ब्रह्म यत्तत् पञ्चकोषविवेकतः। बोद्धुं शक्यं ततः कोषपञ्चकं प्रविच्यताम्। देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः। ततः कर्त्ता ततोभोक्ता गुहा सेयं परम्परा" पञ्चद०।

**आनन्दसम्भव** पु० आनन्दस्य ब्रह्मानन्दस्य सम्भवः प्रकाशः। तत्त्वज्ञानप्रयोज्ये ब्रह्मानन्दस्फुरणे। "आनन्दसम्भवे लीनोनापश्यसुभयं मुने! पुरा०। सम्भवत्यस्मात् अपा-दानेऽप् आनन्दः सम्भवोऽस्य। २भूतादौ त्रि० आनन्द-प्रभवशब्दे विवृतिः।

**आनन्दा** स्त्री आनन्दयति सेवनात् आ+नदि–णिच्–अच्। विजयायाम् (सिद्धि) राजनि०।

**आनन्दार्णव** पु०आनन्दः अर्णव इव असीमत्वात्। ब्रह्मा-नन्दे अखण्डानन्दरूपत्वादपरिच्छिन्नत्वाच्चास्य तथात्वम्। प्रमोदार्णवादयोऽप्यत्र। "ब्रह्म प्रमोदार्णवमिति" नैष०।

**आनन्दि** पु०आ+नदि–इन्। १हर्षे "कौशल्यानन्दिवर्द्ध-नोराम" इति रामायणम्। २कौतुके च।

**आनन्दित** त्रि०आ+नदि–क्त।१हर्षयुक्ते सुखिनि, आ+नदि–णिच्–क्त। यस्यानन्दो जनितस्तस्मिन् २अभिनन्दिते त्रि०।

**आनन्दिन्** त्रि० आ+नदि–णिनि। १आनन्दयुक्ते णिच्–